# Rāmāyana 1.2

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः ।
पूजयामास धर्मात्मा सहशिष्यो महामुनिः ॥ १-२-१

यथावत्पूजितस्तेन देवर्षिर्नारदस्तथा ।
आपृष्ट्वैवाभ्यनुज्ञातस्स जगाम विहायसम् ॥ १-२-२

स मुहूर्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥ १-२-३

स तु तीरं समासाद्य तमसाया महामुनिः ।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ १-२-४

अकर्दममिदं तीर्थं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ १-२-५

न्यस्यतां कलशस्तात दीयतां वल्कलं मम ।
इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ १-२-६

एवमुभो भरद्वाजो वाल्मीकेन महात्मना ।
प्रयच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ १-२-७

स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ।
विचचार ह पश्यं स्तत्सर्वतो विपुलं वनम् ॥ १-२-८

तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् ।
ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिस्वनम् ॥ १-२-९

तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघ्नान वैरनिलयो निषादस्तस्य पश्यतः ॥ १-२-१०

तं शोणितपरीतां वेष्टमानं महीतले ।
भार्या तु निहितं दृष्ट्वा रुराव करुणां गिरम् ॥ १-२-११

तदा तु तं द्विजं दृष्ट्वा निषादेन निपातितम् ।
ऋशेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ १-२-१२

ततः करुणवेदित्वादधर्मोऽयमिति द्विजः ।
निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ १-२-१३

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ १-२-१४

तस्त्यैवं ब्रुवतिश्चिन्तै बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकघ्नेः किमिदं व्याहृतं मया ॥
१-२-१५

चिन्तयन् स महाप्राग्ज्ञश्चकार मतिमान् मतिम् ।
शिष्यम् चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥ १-२-१६

पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे स्लोको भवतु नान्यथा ॥
१-२-१७

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् ।
प्रतिजग्राह सन्तुष्टस्तस्य तुष्टोऽभवद्गुरुः ॥ १-२-१८

सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि ।
तमेव चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥ १-२-१९

भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान् मुनिः ।
कलशम् पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ १-२-२०

स प्रविश्यास्रमपदं शिष्येण सह धर्मवित् ।
उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥
१-२-२१

आजगाम ततो ब्रह्मो लोककर्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुम् तं मुनिपुङ्गवम् ॥ १-२-२२

वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः ॥
१-२-२३

पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ।
प्रणम्य विधिवच्चैनं पृष्ट्वानामय मव्ययम् ॥ १-२-२४

अथोपविश्य भगवानासने परमार्चिते ।
वाल्मीकये महर्षये सन्दिदेशासनं ततः ॥ १-२-२५

उपविष्टे तदा तस्मिन् साक्षाल्लोकपितामहे ।
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥ १-२-२६

पापात्मना कृतं कर्म वैरग्रहणबुद्धिना ।
यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥ १-२-२७

शोचन्नेव मुहुः क्रौञ्चीमुपश्लोकमिमं पुनः ।
जगावन्तर्गतमना भूत्वा शोकपरायणः ॥ १-२-२८

तमुवाच ततो ब्रह्मा प्रहसन्मुनिपुङ्गवम् ।
श्लोक एव त्वया बद्धो नात्र कार्या विचारणा ॥
१-२-२९

मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती ।
रामस्य चरितं सर्वं कघरु त्वमृषिसत्तम । १-२-३०

धर्मात्मनो गुणवतो लोके राम्स्य धीमतः ।
वृत्तं कथय धीरस्य यथा ते नारदाच्छश्लरुतम् ॥
१-२-३१

रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ।
रामस्य सहसौमित्रे राक्षसानां च सर्वशः ॥ १-२-३२

वैदेह्याश्चापि यद्वृत्तम् प्रकाशम् यदि वा रहः ।
तच्चाप्यविदितं सर्वं विदितं ते भविष्यति ॥ १-२-३३

न ते वागनृता काव्ये काचिदत्र भविष्यति ।
कघरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् । १-२-३४

यावत् स्थास्यन्ति गिरयः सरिताश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥ १-२-३५

यावद्रामायणकथा त्वत्कख्नता प्रचरिष्यति ।
तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि ॥ १-२-३६

इत्युक्त्वा भगवान् ब्रह्मा तत्रैवान्तरधीयत ।
ततः सशिष्यो भगवान्मुनिर्विस्मयमाययौ ॥
१-२-३७

तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ।
मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥
१-२-३८

समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ।
सोऽनुव्याहरणाद्भूयः श्लोकः श्लोकत्वमागतः ॥
१-२-३९

तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः ।
कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् ॥
१-२-४०

उदारवृत्तार्थपदैर्मनोरमैस् ।
तदास्य रामस्य चकार कीर्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो ।
यशस्करं काव्यमुदारधीर्मुनिः ॥ १-२-४१

॥ इति श्रीमद्रामायणे बालकान्डे द्वितीय सर्गः ॥